*ACP-III/Sanskrit-303-MIL-2/19*

# B.A. Semester III (Honours / Programme) Examination, 2018-19

## SANSKRIT

**Course ID : 30919** **Course Code : ACP-303-MIL-2**

Course Title: MIL-2 Sanskrit

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

**विभागः कः**

**1.** निम्नलिखितप्रश्नेषु ***पञ्च***प्रश्नानाम् उत्तरं प्रदेयम् । 2×5=10

(a) मकरभार्या मकरात् किं प्रार्थयामास?

(b) पद्मनिधिः स्वप्ने मणिभद्रं किं कर्तुम् आदिष्टवान्?

(c) पञ्चतन्त्रं केन विरचितम्? पञ्चतन्त्रं कीदृशं साहित्यम्?

(d) केन सह कः गोष्ठीसुखम् अनुभूतवान्?

(e) वानरमकरकथा कस्मिन् तन्त्रे अस्ति? तस्य तन्त्रस्य किं नाम?

(f) कदा मणिभद्रः विषण्णोऽभवत्?

(g) पञ्चनां तन्त्राणां नामानि कानि?

(h) ब्राह्मणपुत्राः किमर्थं देशान्तरं गन्तुमिष्टवन्तः?

**2.** अधोनिर्दिष्टेषु यथानिर्देशं यथेच्छं ***चत्वारः*** प्रश्नाः समाधेयाः। 5×4=20

(a) अधोलिखितेषु ***पञ्चनां*** सन्धि कार्यः। 5

(i) मृत् + मयः

(ii) साधु + उक्तम्

(iii) पितृ + आलयः

(iv) निः + रोगः

(v) पतन् + तरुः

(vi) कवी + इमौ

(vii) महान् + आग्रहः

(b) अधोलिखितेषु ***पञ्चनां*** सन्धिविच्छेदः कार्यः। 5

(i) वागीश

(ii) हसन्नागतः

(iii) गवाक्षः

(iv) मनीषा

(v) यद्यपि

(vi) प्रातरेव

(vii) पतञ्जलिः

(c) अधोलिखितेषु *पञ्चनां* विग्रहवाक्यं विलिख्य समासः निरूपणीयः। 5

(i) वीणापाणिः
(ii) दुर्भिक्षम्
(iii) नीलोत्पलम्
(iv) त्रिभुवनम्
(v) यथाशक्ति
(vi) घनश्यामः
(vii) वटच्छाया

(d) अधोलिखितेषु *पञ्चनां* समासबद्धरूपं लिखिता समासः निरूपणीयः। 5

(i) दिनं दिनं
(ii) कविषु श्रेष्ठः
(iii) अहयश्च नकुलश्च
(iv) महान् पुरुषः
(v) कुम्भं करोति यः सः
(vi) मक्षिकायाः अभावः
(vii) पञ्चनां वटानां समाहारः

(e) अयं निजो परो वेति गणना लघुचेतसाम्।
उदारचरितानान्तु वसुधैव कुटुम्बकम्।। — व्याख्यायताम्।

(f) प्रियो वा यदि वा द्वेष्यो मूर्खो वा यदि वा पण्डितः।
वैश्वदेवान्तमापन्नः सोऽतिथिः स्वर्गसङ्क्रमः।। — व्याख्यायताम्।

(g) कुदृष्टं परिज्ञातं कुश्रुतं कुपरीक्षितम्।
तन्नरेण न कर्तव्यं नापितेनाऽत्र यत्कृतम् — इत्यत्र नापितेन यत् कृतं तत् समासेन उपस्थाप्यताम्।

**3.** अधोनिर्दिष्टेषु **एकः** प्रश्नः समाधेयाः। 10×1=10

(a) **अनुच्छेदं पठित्वा निम्नप्रदत्ताः प्रश्नाः समोधेयाः।**

अस्ति कस्मिंश्चित् समुद्रोपकण्ठे महान् जम्बुपादपः सदाफलः, तत्र च रक्तमुखो नाम वानरः प्रतिवसति स्म। अथ कदाचित् तस्य तरोरधस्तात् करालमुखो नाम मकरः समुद्रसलिलान्निष्क्रम्य सुकोमलवालुकासनाथे तीरोपान्ते न्यविशत्। ततश्च रक्तमुखेन स प्रोक्तः– भो भवान् समभ्यागतोऽतिथिः। तद् भक्षयतु मया दत्तान्यमृतकल्पनि जम्बुफलानि। उक्तञ्च–

प्रियो वा यदि वा द्वेष्यो मुर्खो वा यदि पण्डितः।
वैश्वदेवान्तमापन्नः सोऽथितिः स्वर्गसंक्रमः।।

(i) जम्बुपादपः कुत्र कीदृशश्च आसीत्? 2×5=10
(ii) जम्बुपादपे कः प्रतिवसति स्म? तस्य नाम किम्?
(iii) करालमुखः कस्य नाम? स कुतः समागतः?
(iv) वानरः करालमुखं किमुक्तवान्?
(v) समभ्यागतोऽतिथिः, दत्तान्यमृतफलानि इत्यनयोः पदयोः *सन्धिविच्छेदं* करोतु।

(b) **अनुच्छेदं पठिता अधोनिर्दिष्टाः प्रश्नाः समाधेयाः।**

अस्ति दाक्षिणात्ये जनपदे पाटलिपुत्रं नाम नगरम्। तत्र मणिभद्रो नाम श्रेष्ठी प्रतिवसति स्म। तस्य च धमार्थकामकर्माणि कुर्वतो विधिवशाद् धनक्षयः सञ्जातः। ततः विभवक्षयादपमानपरम्परया परं विषादं गतः। अथान्यदा रात्रौ सुप्तश्चिन्तितवान्। अहो धिगियं दरिद्रताम्।

उक्तञ्च–

शीलं शौचं क्षान्तिर्दाक्षिण्यं मधुरता कुले जन्म।
न विराजन्ति हि सर्वे वित्तविहीनस्य पुरुषस्य।।

(i) नगरस्य नाम किम्? तत् कुत्र आसीत्? 2×5=10

(ii) श्रेष्ठिणो नाम किम्? तस्य किम् अभवत्?

(iii) श्रेष्ठी कथं विषादं गतः?

(iv) वित्तविहीनस्य पुरुषस्य कानि न विराजन्ति?

(v) श्रेष्ठी कदा किं चिन्तितवान्?

(b) **अनुच्छेदं पठित्वा सर्वे प्रश्नाः समाधेयाः।** 10

अस्ति कस्मिंश्चित् कूपे गङ्गदत्तो नाम मण्डूकराजः। स कदाचिद दायादैरुद्वेजितोऽरघट्टघटीमारुह्य निष्क्रान्तः। अथ तेन चिन्तितं यत् कथं तेषां दायादानां मया प्रत्यपकारः कर्तव्यः।

उक्तञ्च–

आपदि येनापकृतं येन च हसितं दशासु विषमासु।
अपकृत्य तयोरुभयोः पुनरपि जातं नरं मन्ये।।

एवं चिन्तयन् विले प्रविशन्तं कृष्णसर्पमपश्यत्। तद् दृष्ट्वा भूयोऽप्यचिन्तयत्–यदेनं तत्र कूपे नीत्वा सकलदायादानामुच्छेदं करोमि।

उक्तञ्च–

शत्रुभिर्योजयेच्छत्रुं बलिना बलवत्तरम्।
स्वकार्याय यतो न स्यात् काचित् पीडात्र तत्क्षये।।

(i) गङ्गदत्तः कः? स कुत्र वसति स्म? 2×5=10

(ii) स कथं निष्क्रान्तः?

(iii) तेन किं चिन्तितम्?

(iv) चिन्तयन् गङ्गदत्तः कं दृष्टवान्? ततः पुनः स किम् चिन्तितवान्।

(v) स्वकार्याय किं कर्तव्यम्?

———